शिनिः। मेघयोनित्वादेवास्य तथात्वम्।) धूमः। इति हेमचन्द्रः॥

जीरः, पुं, ( जवतीति। जु गतौ+"जोरी च।" उणां २। २३। इति रक् ईश्वान्तादेशः। ) जीरकः। खड्गः। इति मेदिनी। रे, ३६॥ अनुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ ( विद्यावति, त्रि। यथा, ऋग्वेदे। १।४४।११।
"मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्त्यम्।"
"जीरं विद्यावन्तम्।" इति दयानन्दभाष्यम्॥)

जीरकः, पुं, ( जीर+संज्ञायां कन्। ) वणिग्द्रव्यविशेषः। जीरा इति भाषा। तत्पर्य्यायः। जरणः २ अजाजी ३ कणा ४। इत्यमरः। २।९।३६॥ जीर्णः ५ जीरः ६ दीप्यः ७ जीरणः ८ अजाजिका ९ वह्निशिखः १० मागधः ११ दीपकः १२। इति जटाधरः॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। वातगुल्माध्मानातीसारग्रहणीक्रिमिनाशित्वञ्च। इति राजनिर्घण्टः॥ रुचिस्वरकारित्वम्। गन्धयुक्तत्वम्। कफवातनाशित्वम्। पाके कटुत्वम्। तीक्ष्णत्वम्। लघुत्वम्। पित्तवर्द्धनत्वञ्च। इति राजवल्लभः॥ अपि च। शुक्लजीरा कृष्णजीरा कलौञ्जी एषां नामानि गुणाश्च।
"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः।
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः॥
कालाजाजी तु सुषवी कालिका चोपकालिका।
पृथ्वीका कारवी पृथ्वी पृथुस्तूणोपकुञ्चिका॥
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि।
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
ज्वरघ्नं पाचनं वल्यं वृष्यं रुच्यं कफापहम्॥
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्॥"
इति भावप्रकाशः॥

जीरणः, पुं, (जीरकः पृषोदरादित्वात् कस्य णः।) जीरकः। इति राजनिर्घण्टः॥

जीरिका, स्त्री, ( जीर्य्यतीति। जॄ+बाहुलकात् रिक्। ईश्वान्तादेशः। ततः स्वार्थे कन्। ) वंशपत्रीतृणम्। इति राजनिर्घण्टः॥

जीर्णं, क्ली, ( जीर्य्यति स्मेति। जॄ ष् वयोहानौ+गत्यर्थेति क्तः। निष्ठातस्य नत्वम्। ) शैलजम्। इति राजनिर्घण्टः॥ (वयःप्रकारविशेषः। यथा, "तद्वयो यथा स्थूलभेदेन त्रिविधम्। बालं मध्यं जीर्णमिति।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

जीर्णः, पुं, ( जीर्य्यत्यनेनेति। जॄ+करणे क्तः। ) जीरकः। इति राजनिर्घण्टः॥ (वृक्षः। इति हेमचन्द्रः। ४। १८०॥ )

जीर्णः, त्रि, ( जीर्य्यतीति। जॄ+"गत्यर्थाकर्म्मकश्लिषेति।" ३। ४। ७२। इति कर्त्तरि क्तः। ) वृद्धः। इत्यमरः। २। ६। ४२॥ पुरातनः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। २०। १७।
"तत्याज देहं धर्म्मात्मा देही जीर्णमिवाम्बरम्॥")
गतबहुवयः। जराविशिष्टः। पक्वः। पाकविशिष्टः॥ * ॥ ( यथा, चाणक्ये। ७९।
"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतम्॥")
अथ जीर्णद्रव्याणि।
"नारीकेलफलेषु तण्डुलमथ चीरं रसाले हितं
जम्बीरोत्थरसो घृते समुचितः सर्पिस्तु मोचाफले।
गोधूमेषु च कर्कटी हिततमा मांसात्यये काञ्जिकं
नारङ्गे गुड़भक्षणञ्च कथितं पिण्डारके कोद्रवः॥
पिष्टान्ने सलिलं पियालफलजे पथ्या हिता माषजे
खण्डं चीरभवे तु तक्रमुचितं कोष्णाम्बु कोलम्बजे।
मत्स्ये चूतफलं त्वजीर्णशमनं मध्वम्बुपानात्यये
तैलं पौष्करजे कटुप्रशमनं शेषांस्तु बुद्ध्या जयेत्॥

पनसे कदलं कदले च घृतं
घृतपाकविधावपि जम्बुरसः।
तदुपद्रवशान्तिकरं लवणं
लवणेषु च तण्डुलवारि वरम्॥
नारिकेलफलतालबीजयोः
पाचनं य इह तण्डुलं विदुः।
ते वदन्ति मुनयोऽथ तण्डुलान्
चीरवारि परिपाचयत्यपि॥
दाड़िमामलकताततिन्दुकी-
बीजपूरलवलीफलान्यपि।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं स्वमूलतः॥
मधूक-मालूर-नृपादनानां
परूषखर्ज्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमर्द्दबीजं
घृतेऽपि तक्रं प्रवदन्ति पथ्यम्॥
गोधूममाषहरिमन्थसतीनमुद्ग-
पाको भवेदिति च मातुलपत्रकेण।
खर्ज्जूरिकाविशकशेरुसितासु शस्तं
शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम्।
मिश्रितपनसयोः स्यादाम्रबीजेन पाकः
कृशरमहिषयोषित्क्षीरयोः सैन्धवेन।
चिपिटपरिणतिः स्यात् पिप्पलीदिप्यकाभ्यामपहरति तुषाम्भो वैदलानामजीर्णम्॥
कर्पूरपूगीफलनागवल्ली-
काश्मीरजातीफलजातिकोशम्।
कस्तूरिका सिङ्कनारिकेल-
जलं पचत्याशु समुद्रफेनः॥
श्यामाकनीवारकुलत्थषष्टि-
निष्पावकङ्गूदधिमस्तकस्तु।
चिञ्चाकुलत्थौ तिलतैलयोगात्
जटाब्दनादस्य निहन्त्यथाम्रम्॥
कशेरुशृङ्गाटमृणालमुद्दी-
खर्ज्जूरखण्डा अपि नागरेण।
पलाशभस्माम्बु तथार्द्रजो वा
रसो निहन्याद्रसमिक्षुजातम्॥
अम्लेन केनाप्यथ कोष्णकेन
कोष्णाम्बुना वा घृतमेति पाकम्।
तिलादितैलान्यपि काञ्जिकेन
सर्व्वस्य मज्जा पनसामलक्यौ॥
किमत्र चित्रं बहुमांसमत्स्य-
भोजी सुखी स्यात् परिपीय शुक्तम्।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यं परिपाकमेति॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि जग्ध्वा।
काशस्य मूलं परिपेयमुष्णं
सुखीभवेन्ना बहुशो न भूतम्॥
चोचे रसाला सुरभीयवस्तु-
मण्डेन कोष्णेन विपाकमेति।
शङ्खस्य चूर्णेन हयारिनारी-
पयोदधिक्षीरमुपैति पाकम्॥
वटी वेसवाराल्लवङ्गेन पिष्टी-
शमं पर्पटः शिग्रुबीजेन याति।
कणाम्लतो लड्डुका पूपकादे-
र्व्विपाको भवेच्छष्कुलीमण्डयोश्च॥
श्वाविन्नोधा गण्डकाश्चित्रतैलाद्-
यावत् चारात् कोलकूर्म्मादयोऽपि।
जीर्य्यन्त्येवं पायसो मुद्गयूषात्
सामुद्रादप्यारनालं सुखाय॥
तप्तं तप्तं हेम वा तारमग्नौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः।
पीत्वावश्यं दीर्घकालोपपन्न-
मम्भो जीर्णं शीघ्रमेवं जहाति॥
पालङ्किकाकेसुककारवल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम्।
उपोदकालावुपटोलकानां
सिद्धार्थको मेघवरस्य पक्ता॥
शुण्ठीसतीनस्य च नागरङ्ग-
जम्बीरयोः कोद्रवको निहन्ता।
जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं बहुशो न भूतम्॥
पटोलवंशाङ्कुरकारवल्ली-
फलान्यलावूनि बहूनि जग्ध्वा।
चारोदकं ब्रह्मतरोर्न्निपीय
भोक्तुं पुनर्व्वाञ्छति तावदेव॥
विपच्यते शूरणको गुड़ेन
तथालुकं तण्डुलतोयपानात्।
जम्बीरनीरेण निशारशोनं
सुखेन तूर्णं परिपाकमेति॥
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्वथितेन पाकः।
शाकानि सर्व्वाण्युपयान्ति पाकं
चारेण सद्यस्तिलनालजेन॥
आम्रातकोडुम्बरपिप्पलीनां
फलानि च प्लक्षवटादिकानाम्।
स्युः शामनं पर्य्युषितोदकेन
पियालमज्जा च कटुष्णकेन॥